# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

---

### ०१६ – व्यस्तविधिः

१९ - ०१ - २०१९

# गतकक्ष्यायाम् ...

- शून्यपरिकर्माष्टकम्

# अस्यां कक्ष्यायाम् ...

- व्यस्तविधिः

# व्यस्तविधिः

छेदं गुणं गुणं छेदं वर्गं मूलं पदं कृतिम् ।
ऋणं स्वं स्वमृणं कुर्याद्दृश्ये राशिप्रसिद्धये ।।
अथ स्वांशाधिकोने तु लवाढ्योनो हरो हरः
अंशस्त्वविकृतस्तत्र विलोमे शेषमुक्तवत् ।।

अन्वयः - विलोमे दृश्ये राशौ छेदं गुणं, गुणं छेदं, वर्गं मूलं, पदं कृतिम्, ऋणं स्वं, स्वम् ऋणं कुर्यात् राशिप्रसिद्धये । अथ स्वांशोधिकोने तु लवः आढ्यः ऊनः हरो हरः कार्यः । तत्र अंशः अविकृतः एवं शेषः उक्तवत् कार्यम् ।

# बुद्धिविलासिनी

अथ प्रकीर्णान्यारभ्यन्ते । तत्र विलोमक्रियाया सङ्कलिताद्यष्टकस्यांशानाञ्च विद्यमानत्वादनन्तरं प्राधान्येन विलोमक्रियामनुष्टुब्द्वयेनाह छेदं गुणं गुणं छेदमिति । अथ स्वांशाधिकोनेति । दृश्यतेऽसौ दृश्यः । अत्र पृच्छकालापे कृते सति यावान्प्रसिद्धो राशिर्दृश्यते स दृश्य इत्यर्थः । तस्मिन् दृश्ये राशौ पूर्वराशिप्रसिद्धये छेदं गुणं कुर्यादित्यादिवर्गोपलक्षणेन घनं घनमूलं कुर्यात् । घनमूलं घनं च कुर्यादित्यवगन्तव्यम् । अथ स्वांशैरधिकोने राशावालापिते सति तैः स्वलवैः क्रमेण युक्तोनो हरो हरः स्यात् । तत्रांशस्त्वविकृतो यथास्थित एव । शेषं धनर्णव्यत्यययादिकमुक्तवत्स्यात् ।

# बुद्धिविलासिनी

अत्रोपपत्तिः - गुणेन गुण्ये गुणिते यत्फलं तस्मिन्फले हरीकृतेन तेन गुणेन भक्ते पूर्वगुण्यो लभत इत्याद्युक्तं प्राक् । एवं वर्गवर्गमूलादावप्यन्योन्यम् । अत उक्तं छेदं गुणमित्यादि । अथ स्वांशेति । यथा को राशिस्त्रिभिः स्वचरणैरन्वितो दृष्ट इति प्रश्ने सति यो राशिः स्वपादत्रयेण युक्तः स्वचतुर्थांशसप्तकं स्यात् । यतः पूर्वराशिः स्वचरणचतुष्टयतुल्योऽस्त्येव । अतश्चतुर्थांशसप्तकात्मकस्य राशेः सप्तमांशः पूर्वराशिचतुर्थांशसमः स्यात् । अतो दृष्टराशिः स्वसप्तमांशत्रयेणोनः पूर्वराशिः स्यात् । एवं स्वांशोनेप्यूह्यम् । अत उक्तम् । अथ स्वांशाधिकोनेत्यादि ।

# उद्देशकः

अत्रोदाहरणं शार्दूलविक्रीडितेनाह -

यस्त्रिघ्नस्त्रिभिरन्वितः स्वचरणैर्भक्तस्ततः सप्तभिः
स्वत्र्यंशेन विवर्जितः स्वगुणितो हीनो द्विपञ्चाशता ।
तन्मूलेऽष्टयुते हृते च दशभिर्जातं द्वयं ब्रूहि तं
राशिं वेत्सि हि चञ्चलाक्षि विमलां बाले विलोमक्रियाम् ।।

# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

## ०१६ – व्यस्तविधिः

१९ - ०१ - २०१९